39 a) K2 भ्रातॄनथापेत्य; D1 भ्रातॄंस्तथोपेत्य; D2.6 भ्रातॄनथालोक्य; D3 (marg. sec. m.) T2 M4 °नथोवाच; T1 G °नथोत्पत्य. D1 तवाह; T2 तथापि (for तवापि). — b) B3 ततो (for तस्मिन्). G2 प्रवृत्ते (for विमर्दे). B Da Dn D4.5.7.8 सहसाभ्युवाच; D3 महति प्रपन्ने;

C. 6. 3376
B. 6. 77. 40
K. 6. 77. 46

समागतो भीमसेनेन सार्धम् ।
तं यात सर्वे सहिता निहन्तुं
मा वो रिपुः प्रार्थयतामनीकम् ॥ ३९
श्रुत्वा तु वाक्यं तममृष्यमाणा
ज्येष्ठाज्ञया चोदिता धार्तराष्ट्राः ।
वधाय निष्पेतुरुदायुधास्ते
युगक्षये केतवो यद्वदुग्राः ॥ ४०
प्रगृह्य चित्राणि धनूंषि वीरा
ज्यानेमिघोषैः प्रविकम्पयन्तः ।
शरैरवर्षन्द्रुपदस्य पुत्रं
यथाम्बुदा भूधरं वारिजालैः ।
निहत्य तांश्चापि शरैः सुतीक्ष्णै-
र्न विव्यथे समरे चित्रयोधी ॥ ४१
समभ्युदीर्णांश्च तवात्मजांस्तथा
निशाम्य वीरानभितः स्थितान्रणे ।
जिघांसुरुग्रं द्रुपदात्मजो युवा
प्रमोहनास्त्रं युयुजे महारथः ।
क्रुद्धो भृशं तव पुत्रेषु राज-
न्दैत्येषु यद्वत्समरे महेन्द्रः ॥ ४२
ततो व्यमुह्यन्त रणे नृवीराः

D8 महती प्रवृत्ते; T1 G तव संप्रवृत्ते (G2 °मर्दे); T2 M सहसा प्रवृत्ते. — After 39b, T1 G ins.:

304* दृष्ट्वा रणे वाक्यमिदं बभाषे ।

— d) T2 कथं (for अयं). Ś1 महात्मा (for दुरात्मा). — e) D8 ते (for तं). B3.4 Dn1 (marg.). n2 D4.7.8 M4 याम; T2 ज्ञात; G2 यांत (for यात). K3.5 D2 महता; B2 M4 सहसा (for सहिता). Ś1 नियंतुं; K1 निहंतं; K3.5 D2 बलेन (for निहन्तुं). — f) K2 B3.4 D4.6–8 मा नो; T2 मया; G2 माया- (for मा वो). Ko.2.4 D2.6 S अनीके; K1 अनीकी. D1 पापो ह्ययं रे मर्दतामद्य संख्ये. — After 39, D1 ins.:

305* आर्छेत्येतं क्षुद्रकर्मातिहीनं
सैन्यं च विध्वंसयते पृषत्कैः ।

40 a) B1.3.4 Da Dn D1.4–8 T2 M4 [अ]थ; B2 D8 T1 G च; D2 तु; M2 [अ]पि (for तु). K5 M3.5 तव सृष्य°; T1 G4 M1.2.4 तदसृष्य°. — b) Ko.1 ज्येष्ठाज्ञाया. Ś1 Da1 चोदित-; K2.3.5 B1.2 D2.7.8 नोदिता; K4 देशिता (for चोदिता). Ś1 -धार्तराष्ट्रः. — c) Ś1 मे (for ते). D1 ततोभ्यधावंत युदायुधास्ते. — d) B3 कैतवो (for केतवो). B8 युद्धमुग्राः; D1 यर्हिदुग्राः; D2 [ऽ]युद्धदुग्राः; T2 -च द्रुमहाः; G3 यत्तदुग्रः; M4 यद्धदुग्राः (for यद्वदुग्राः).

41 a) Ko संगृह्य; K1 सस्पृह्य; K2 संग्रह्य; B3 प्रसृह्य. K3.5 B2.4 Dn1 D2.7 चापानि (for चित्राणि). Da1 वीरो; D8 चैव (for वीरा). — b) K2.4 B D4 T1 G4 ज्यां (for ज्या-). Ś1 प्रविकंपयंत; D1 °कर्षयंतः; G1–3 परिकंपयंतः. — c) Ś1 B8 T1 G M4 वर्षुर् (for अवर्षन्). — d) G2 अथ (for यथा). K1.3 Da1 भूधर- (for °धरं). D1 अंबुवेगैः (for वारिजालैः). — e) Ś1 D8 निहत्य(D8 °न्य)मानोपि (for निहत्य तांश्चापि).

42 a) Ko.2 समन्युदीर्णांश्च; K4 समभ्युदीर्णांस्तु; Da1 समभ्युदीर्णश्च; M1.2 समं ह्युदीर्णांश्च. D6 हतात्मजांस; T1 तदात्मजांस् (for तवा°). T1 G3.4 तदा; M1–3.5 च (for तथा). D1 स तानुदीर्णांस्तव राजपुत्रान्. — b) Ko–4 B Da Dn D2–7 M4 निशम्य (for निशाम्य). D8 अभितस्थिवान्; T2 अभितस्तथा; G2 अहितस्थितान्; M1–4 आभितास्थितान्. D1 निशम्य वीरो युधि युद्धशौंडः. — c) Ś1 उग्रां; D1 आजौ; T1 G2.4 उग्रो (for उग्रं). D1 [ऽ]सौ; T G M4 रणे; M1–3.5 [ऽ]पि (for युवा). — d) Ś1 युयुधे; K5 प्रयुजे (for युयुजे). K2 महारथ; D1 महात्मा. — e) D6 पुत्रेण (for पुत्रेषु). D1 क्रुद्धस्तु राजंस्तव पुत्रकेषु; S पुत्रेषु ते क्रोध(M4 कोप)वशेन (T2 G2 M1–3.5 °षु) राजन्. — f) Da1 युध (sic); Dn1 युध्यन् (for यद्वत्). M1–3.5 सुरेंद्रः (for महेन्द्रः). D1 दैत्येषु युध्यन्निव वज्रहस्तः. — After 42, S ins.:

306* स वै ततोऽस्त्रं सुमहाप्रभावं
प्रमोहनं द्रोणदत्तं महात्मा ।
प्रयोजयामास उदारकर्मा
तस्मिन्रणे तव सैन्यस्य राजन् ।

[(L. 1) M1–3 सुमहत्प्रभावं. — (L. 2) M5 सुमोहनं. — (L. 3) G1.3 सुसार° (for उदार°). — (L. 4) T2 क्षणे (for रणे).]

43 a) Ś1 Ko–2 [ऽ]प्यमुह्यंत; T G M4 विमुह्यं-

प्रमोहनास्त्राहतबुद्धिसत्त्वाः ।
प्रदुद्रुवुः कुरवश्चैव सर्वे
सवाजिनागाः सरथाः समन्तात् ।
परीतकालानिव नष्टसंज्ञा-
न्मोहोपेतांस्तव पुत्रान्निशम्य ॥ ४३
एतस्मिन्नेव काले तु द्रोणः शस्त्रभृतां वरः ।
द्रुपदं त्रिभिरासाद्य शरैर्विव्याध दारुणैः ॥ ४४
सोऽतिविद्धस्तदा राजन्रणे द्रोणेन पार्थिवः ।
अपायाद्द्रुपदो राजन्पूर्ववैरमनुस्मरन् ॥ ४५
जित्वा तु द्रुपदं द्रोणः शङ्खं दध्मौ प्रतापवान् ।
तस्य शङ्खस्वनं श्रुत्वा वित्रेसुः सर्वसोमकाः ॥ ४६
अथ शुश्राव तेजस्वी द्रोणः शस्त्रभृतां वरः ।
प्रमोहनास्त्रेण रणे मोहितानात्मजांस्तव ॥ ४७
ततो द्रोणो राजगृद्धी त्वरितोऽभिययौ रणात् ।
तत्रापश्यन्महेष्वासो भारद्वाजः प्रतापवान् ।
धृष्टद्युम्नं च भीमं च विचरन्तौ महारणे ॥ ४८

C. 6. 3388
B. 6. 77. 32
K. 6. 77. 60

T_2 °ह्य)ति (for व्यमुह्यन्त). Da_1 Dn_1 नृवीरा; $M_{1-3.5}$ प्रवीराः. — ^{b}) D_1 प्रमोहितास्त्रेण विभिन्नकायाः. — ^{c}) D_2 प्रादुद्रुवुः; D_6 दुद्रुवुः. $Ś_1$ K_{0-2} D_1 कौरवाश्चापि; K_3 Dn_2 कौरवां(Dn_2 °वा)श्चैव; $M_{3.5}$ कुरवश्चापि. $Ś_1$ K_{0-2} संख्ये (for सर्वे). — ^{d}) G_1 °नादाः; M_1 (*sup. lin.*) °नानाः (for °नागाः). K_1 सुरथाः; D_1 सहितास् (for सरथाः). D_1 तदानीं; D_6 समंततः. — ^{e}) $Ś_1$ परीतकल्पानिव; B_3 °कालान्प्रवि- (for °कालानिव). K_1 नष्टसंज्ञां; D_5 रिष्टसंज्ञान्. D_1 S परीतकाला इव नष्टसंज्ञा (D_1 °ज्ञाः). — ^{f}) $Ś_1$ देहोपेतांस्; K_4 मोहितांस्; Da_1 D_5 मोहा(Da_1 °ह)पेतांस्; D_2 मोहैरुपेतांस् (for मोहोपेतांस्). Da_1 D_8 पुत्रा. K_4 निशाम्य. D_1 संमोहिताश्चा गजपत्तयस्ते; S मोहाश्रया (T_2 °हाद्दिशो; M °हाच्छ्रेयो) नाधि(T_1 G_4 नाव)गच्छंति किंचित् (T_2 तावत्). — After 43, S ins.:

307* एतस्मिन्नेव काले तु भीमः प्रहरतां वरः ।
विश्रम्य च तदा राजन्पीत्वामृतरसं जलम् ।
पुनः संनह्य सहसा योधयामास संयुगे ।
धृष्टद्युम्नेन सहितः कालयामास भारत ।

[(L. 1) $G_{1.3}$ भीष्मः (for भीमः). — (L. 2) T प्रमृज्य तु (for विश्रम्य च), and °मयं (for °रसं). — (L. 3) T_2 प्रसह्य. T_1 G_4 संक्रुद्धो; M_4 समरे (for सहसा). G_2 पुनः संनह्यभिसंक्रुद्धो (sic). M_3 योज° (for योध°). — (L. 4) T_2 पांडवो युद्धदुर्मदः (for the post. half).]

44 ^{a}) S एतस्मिन्नंतरे राजन्. — $Ko_{.1}$ om. (hapl.) 44^{c}–47^{b}. — ^{cd}) D_1 द्रुपदं पुनरानर्छच्छरैर्गार्ध्रविराजितैः.

45 $Ko_{.1}$ om. 45 (cf. v. l. 44). — ^{a}) Da Dn_1 D_5 सोभि-; D_6 सोपि (for सोऽति-). K_4 B $D_{5.7}$ T_1 G M_4 ततो; T_2 तथा (for तदा). — ^{b}) K_2 Dn_2 D_4 $G_{1.3}$ M रणाद् (M_4 रणो); T_2 शरैर् (for रणे). Da D_5 S द्रोणस्य (for द्रोणेन). Da_1 $D_{1.3}$ T_2 G_2 $M_{1-3.5}$ पार्थिव; T_1 G_4 सायकैः. — ^{c}) $Ś_1$ अपयाद्; T_2 उपयाद्. D_1 शीघ्रं; G_{1-3} $M_{1-3.5}$ राजा (for राजन्).

46 $Ko_{.1}$ om. 46 (cf. v. l. 44). — ^{a}) $Ś_1$ B_3 च; D_1 स; T_1 G तं (for तु). B_{3-4} transp. द्रुपदं and द्रोणः. D_1 वीरः (for द्रोणः). K_2 Dn_2 $D_{4.7.8}$ जित्वा द्रोणस्तु द्रुपदं. — ^{b}) = 6. 23. 12^{d}. S प्रदध्मौ शंखमाहवे. — ^{c}) M_1 (*sup. lin.*) तस्यौ (for तस्य). T_2 शंखध्वनिं. D_8 दृष्ट्वा (for श्रुत्वा). — ^{d}) $Ś_1$ विमेसुः; D_8 विनेशुः. K_5 $D_{1.3.6}$ सर्वसैनिकाः.

47 $Ko_{.1}$ om. 47^{ab} (cf. v. l. 44). — ^{a}) K_3 Da_1 D_8 सुश्राव. — After 47^{ab}, $D_{3.6}$ read (for the first time) 48^{ef}, *repeating* it in its proper place. — ^{c}) D_6 मोहनास्त्रेण च रणे. — ^{d}) K_4 तनयांस् (for आत्मजांस्).

48 ^{a}) T_2 तदा (for ततो). $Ś_1$ राजगृहं; Ko °गृद्धी; K_3 D_2 °गृध्री; K_4 महाराज; K_5 B $D_{1.6}$ राजगृध्री; Da_1 °गृही; Da_2 °गृधी; D_8 गजान्मृद्नन्; T_1 G राजगृध्नुः; T_2 °गृंधी; Ca. c. d राजगृद्धी (as in text). — ^{b}) K_{0-2} व्याययौ; K_{3-5} B D [s]-भ्याययौ (D_1 °यू); T_2 हि ययौ (for ऽभिययौ). B_1 रणे; B_4 D (except Dn_2 $D_{4.7.8}$) S रणं. — ^{d}) $Ś_1$ भरद्वाजः (for भा°). — ^{e}) G_3 दृष्ट° (for धृष्ट°). K_3 om. the second च. — ^{f}) K_2 Da_1 विचरंतो; K_4 विचरंतं; M_{1-3} विचिन्वंतौ (for विचरन्तौ).

49 ^{a}) K_2 मोहाविष्टा च; M_2 °विष्टाश्च. D_1 मोहितांस्तव पुत्रांश्च. — ^{b}) D_1 सोपश्यत (for अपश्यत्स).

C. 6. 3368
B. 6. 77. 52
K. 6. 77. 60

मोहाविष्टांश्च ते पुत्रानपश्यत्स महारथः ।
ततः प्रज्ञास्त्रमादाय मोहनास्त्रं व्यशातयत् ॥ ४९
अथ प्रत्यागतप्राणास्तव पुत्रा महारथाः ।
पुनर्युद्धाय समरे प्रययुर्भीमपार्षतौ ॥ ५०
ततो युधिष्ठिरः प्राह समाहूय स्वसैनिकान् ।
गच्छन्तु पदवीं शक्त्या भीमपार्षतयोर्युधि ॥ ५१
सौभद्रप्रमुखा वीरा रथा द्वादश दंशिताः ।
प्रवृत्तिमधिगच्छन्तु न हि शुध्यति मे मनः ॥ ५२
त एवं समनुज्ञाताः शूरा विक्रान्तयोधिनः ।
बाढमित्येवमुक्त्वा तु सर्वे पुरुषमानिनः ।
मध्यंदिनगते सूर्ये प्रययुः सर्व एव हि ॥ ५३
केकया द्रौपदेयाश्च धृष्टकेतुश्च वीर्यवान् ।
अभिमन्युं पुरस्कृत्य महत्या सेनया वृताः ॥ ५४
ते कृत्वा समरे व्यूहं सूचीमुखमरिंदमाः ।
बिभिदुर्धार्तराष्ट्राणां तद्रथानीकमाहवे ॥ ५५
तान्प्रयातान्महेष्वासानभिमन्युपुरोगमान् ।
भीमसेनभयाविष्टा धृष्टद्युम्नविमोहिता ॥ ५६
न संधारयितुं शक्ता तव सेना जनाधिप ।

B1. 2 om. स. Da Dn1 D5 G1 सु- (for स). — c) K3. 5 प्रभास्त्रम् (for प्रज्ञा°). — d) Ko. 2 विशातयत्; K3–5 B Dn2 D1. 2 (marg. *sec. m.*) M2. 4 व्यनाशयत्; Da1 व्यशातयन्; D2. 3. 6 विनाशयत्; G3 अशातयत्.

50 a) S (except M5) ततः (for अथ). — b) D1 विशां पते; D8 नराधिप; T1 महाबलाः (for महारथाः). — d) K2 प्रययोर्; B1 प्रतीयुर्; D2. 6 प्रययौ (for प्रययुर्). S प्रत्युद्याता जिगीषवः.

51 a) M1–3. 5 राजा (for प्राह). — b) Da Dn1 D5 M2 स; T2 च (for स्व-). — c) K5 M2 गच्छंत (for गच्छन्तु). K2 पदवी; Ca. c °वीं (as in text). D3. 6 भक्त्या (for शक्त्या). — d) M4 इति (for युधि).

52 a) K1 °सुमुखा (for °प्रमुखा). — b) D1 तथा; T2 रथ- (for रथा). Ko S दंसिताः. — D5 om. 52c–53b. — c) D1 अवगच्छध्वं; D2 T G2–4 M4 अभिगच्छंतु (for अधि°). — d) T2 च (for हि). Da1 युध्यति मे; D8 मे शुध्यते; T2 M शुद्धं हि मे; G8 शुध्यंति मे. — After 52, T G M4 ins.:

308* प्रवृत्तिं भीमसेनस्य पार्षतस्य च संयुगे ।
विज्ञाय समरे शीघ्रं प्रविशध्वं रथार्णवम् ।
गच्छन्तु परया शक्त्या भवन्त इति मे मतिः ।

[(L. 1) T2 पांचालस्य (for पार्षतस्य). — (L. 2) T2 विज्ञातुं (for विज्ञाय). T2 प्रविश्यैतद्रणाजिरं (for the post. half). — (L. 3) T2 भक्त्या (for शक्त्या), and मनः (for मतिः).]

53 D5 S (? hapl.) om. 53^{ab} (for D5, cf. v. l. 52). — a) D1 एवं हि; D3. 6 एवं ते (for त एवं). — b) D1 विक्रांतपौरुषाः (for °योधिनः). — D2 om. (hapl.) 53^{cd}. — c) D3 M3. 5 उक्ता तु. — e) D6 मध्यंदिने. — f) S प्रययुस्ते महारथाः.

54 a) MSS. (indiscriminately) कैकया, केकेया, कैकेया, कैक्या. D6 कौंतेया (for केकया). G3 द्रौपदेयश्च. — b) G2 दृष्ट° (for धृष्ट°). — d) Ś1 Da2 Dn1 D5 T2 वृतः.

55 a) G1. 3 भित्त्वा (for कृत्वा). K1. 2 समर-. — b) A few MSS. शूची°. D6 G1–3 अरिंदम; T1 G4 °दमं. — c) K4 B1. 2. 4 D4 T1 G4 विभिदुर्; B3 बीभत्सुर्; D5 विविशुर् (for बिभिदुर्). — d) D1 अत्ययन् (for आहवे).

56 b) T2 आभिमन्युपुरोगमाः. — c) B3 °भयाविष्टान्. — d) Ś1 Ko. 1. 3. 4 B Da1 Dn D1–3. 7 G2. 3 °म्नविमोहिताः (B3 °हितान्; Da1 °हितः); T1 G4 °म्नेन मोहिताः (T1 °ता); M °म्नप्रपीडिताः (M4 °ता).

57 S transp. 57^{ab} and 57^{cd}. — a) K4 B Da Dn1 D5 न संवारयितुं; D1. 3 नालं वारयितुं; D6 न क्षणं धारितुं; T2 सा न धारयितुं. Cc cites संधारयितुं (as in text). Ś1 Ko–3 D2 शक्ताः; D1 शेकुस्; D3 S सेहे; Cd शक्ता (as in text). — b) Ko. 2 सेनां तव; K1 स तां तव; K3 तव सेनां. K4 B Dn2 D3. 6. 8 S नरा° (for जना°). D1 तव पुत्रस्य सैनिकाः. — c) Ś1 मदमूर्छाधृतात्मानं; Ko–2 °धृतात्मानः; K4 मदसंमूर्छितात्मानं (sic); B3. 4 Da Dn D1. 4. 7. 8 मदमूर्छान्वितात्मा हि (Da1 Dn1 °त्मा वै; D1 °त्मानः); S मोहिता (T2 om. मोहिता) म(G1. 3 सं)दमूर्छाभिर्. Cc cites मदमूर्छान्वितः. Cd as in text. — d) K1 प्रमुदेवा°; D1 प्रमदेवात्मनि. Ko. 2. 3 D1. 2. 6 स्थिताः.

मदमूर्छान्वितात्मानं प्रमदेवाध्वनि स्थिता ॥ ५७
तेऽभियाता महेष्वासाः सुवर्णविकृतध्वजाः ।
परीप्सन्तोऽभ्यधावन्त धृष्टद्युम्नवृकोदरौ ॥ ५८
तौ च दृष्ट्वा महेष्वासानभिमन्युपुरोगमान् ।
बभूवतुर्मुदा युक्तौ निघ्नन्तौ तव वाहिनीम् ॥ ५९
दृष्ट्वा च सहसायान्तं पाञ्चाल्यो गुरुमात्मनः ।
नाशंसत वधं वीरः पुत्राणां तव पार्षतः ॥ ६०
ततो रथं समारोप्य केकयस्य वृकोदरम् ।
अभ्यधावत्सुसंक्रुद्धो द्रोणमिष्वस्त्रपारगम् ॥ ६१
तस्याभिपततस्तूर्णं भारद्वाजः प्रतापवान् ।
क्रुद्धश्चिच्छेद भल्लेन धनुः शत्रुनिषूदनः ॥ ६२
अन्यांश्च शतशो बाणान्प्रेषयामास पार्षते ।
दुर्योधनहितार्थाय भर्तृपिण्डमनुस्मरन् ॥ ६३
अथान्यद्धनुरादाय पार्षतः परवीरहा ।
द्रोणं विव्याध सप्तत्या रुक्मपुङ्खैः शिलाशितैः ॥ ६४
तस्य द्रोणः पुनश्चापं चिच्छेदामित्रकर्शनः ।
हयांश्च चतुरस्तूर्णं चतुर्भिः सायकोत्तमैः ॥ ६५
वैवस्वतक्षयं घोरं प्रेषयामास वीर्यवान् ।
सारथिं चास्य भल्लेन प्रेषयामास मृत्यवे ॥ ६६
हताश्वात्स रथात्तूर्णमवप्लुत्य महारथः ।

C. 6. 3407
B. 6. 77. 71
K. 6. 77. 80

T1 G M2 ना(T1 by corr. गौ)रीवाध्वगतेव हि; T2 नारीवध्वागतेजहि (sic); M1. 3–5 नारी ह्य(M1 [*sup. lin.*]. 4 व्य)ध्वगतेव हि.

58 ^{a}) K2 तेभ्ययाता; K4 Da Dn D4. 5. 7. 8 तेभियाय; B ते हि पार्थां; D1 तेभियातान्; D3 तेभियात्वा; S तेपि (T2 ततो; M तेभि-) गत्वा. T2 महेष्वासान्. — ^{b}) K1 सुवर्णनिकृतध्वजः; D2 °विधृतध्वजाः. — ^{c}) Ko–2 परीप्संतोभ्यवर्तंत; D8 °प्सताभ्यधावंत; G2 °प्संतो ह्यधावंत; G3 °प्संतोभ्यधावंतो. — ^{d}) D1 धृष्टद्युम्नपुरोगमाः.

59 D1 om. (hapl.) 59^{ab}. — ^{a}) K4 तौ तु (for तौ च). K3 B1 Da2 D2 महेष्वासाव्; Da1 च सहसान् (for महेष्वासान्). D6 तौ दृष्ट्वा स महेष्वासाव्. — ^{b}) K5 °पुरोगमाः; D5 आभिमन्यु°. — ^{c}) D5 मदा (for मुदा). — ^{d}) K1 निघ्नंतो; D2 निघ्नतौ; D3 विघ्नंतौ. D5 वाहिनी. — After 59, S ins.:

309* द्रोणमिष्वस्त्रकुशलं सर्वविद्यासु पारगम् ।

[G3 सर्वविद्याविशारदं]

60 ^{a}) K5 D2 S (except T2 M4) तु (for च). G1. 3 सहसा शांतं. D1 तान्दृष्ट्वा तु ततः प्रासान्. — ^{b}) K2 पांचाल्ये; Dn2 D4. 7. 8 पांचालो. — ^{c}) Ko. 2 नासंसत; D1 कांक्षमाणो; D6 न संशत; G3 नासंशत. B1 रथं (for वधं). K2 वीर (for °रः). — ^{d}) D1 तदा द्रोणस्य (for पुत्राणां तव). K3. 5 D2 भारत (for पार्षतः).

61 ^{b}) K2 Dn1 D4. 8 वृकोदरः. — Ś1 om. (hapl.) 61^{cd}. — ^{c}) K3 अभ्यधावत्स सं°; B Da Dn1 D1. 3. 5. 6 अभ्यधावत सं°. — ^{d}) Ko–2. 4 इष्वस्त्रसत्तमं; K3. 5 D2 °सागरं; T2 °पुंगवं (for °पारगम्).

62 ^{a}) Dn2 D4. 8 तस्यापि पततस्; M1–3. 5 °भिद्रवतस्. — T1 om. 62^{cd}. — ^{c}) K1 बलेन; K3–5 B2. 3 D2 बाणेन; D6 भगवान्; S (T1 om.) समरे (for भल्लेन). — ^{d}) Ś1 Ko–2. 4 B D7 शत्रुनिसूदनः (Ś1 °नं); K3. 5 D2. 3 °निबर्हणं (D3 °णः); D6 °निकर्षणः. D1 धृष्टद्युम्नस्य कार्मुकं; T2 M तद्धनुः शत्रुसूदनः.

63 ^{a}) K2. 3 अन्याश्च. D3 बहुशो (for शतशो). — ^{b}) M1 भारते; M5 पार्षतं. — ^{d}) Dn2 D4. 7. 8 भर्तुः पिंडम्; G2 भर्तृपीडाम्; G3 भत्रिपिंडम्; Gc भर्तृ° (as in text).

64 ^{b}) S पार्षतः (G2 °दः) क्रोधमूर्छितः. — ^{c}) K3. 5 Dn1 D3 विंशत्या (for सप्तत्या). — ^{d}) M रुग्म° (for रुक्म°). Da1 Dn1 D7 शिलासितैः.

65 ^{b}) Some MSS. °कर्षणः. Ś1 चिच्छेद मित्रकर्षणः.

66 ^{a}) Ko. 2 वैवस्वतं (for °स्वत). D1 यमस्य सदनं द्रोणः; T2 हयानां च क्षयं घोरं. — ^{b}) K3. 5 B D (except D3. 6) S भारत (for वीर्यवान्). — ^{d}) D1 पीतेन निशितेन च. — After 66, D1 ins.:

310* धर्मराजपुरं राजन्प्रेषयामास वै द्विजः ।

67 ^{a}) K2 M4 हताश्वान्स; B1 Da2 Dn1 T1 G

C. 6. 3407
B. 6. 77. 71
K. 6. 77. 80

आरुरोह महाबाहुरभिमन्योर्महारथम् ॥ ६७
ततः सरथनागाश्वा समकम्पत वाहिनी ।
पश्यतो भीमसेनस्य पार्षतस्य च पश्यतः ॥ ६८
तत्प्रभग्नं बलं दृष्ट्वा द्रोणेनामिततेजसा ।
नाशक्नुवन्वारयितुं समस्तास्ते महारथाः ॥ ६९
वध्यमानं तु तत्सैन्यं द्रोणेन निशितैः शरैः ।
व्यभ्रमत्तत्र तत्रैव क्षोभ्यमाण इवार्णवः ॥ ७०
तथा दृष्ट्वा च तत्सैन्यं जहृषे च बलं तव ।
दृष्ट्वाचार्यं च संक्रुद्धं दहन्तं रिपुवाहिनीम् ।
चुक्रुशुः सर्वतो योधाः साधु साध्विति भारत ॥ ७१

इति श्रीमहाभारते भीष्मपर्वणि त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

७४

संजय उवाच ।
ततो दुर्योधनो राजा मोहात्प्रत्यागतस्तदा ।
शरवर्षैः पुनर्भीमं प्रत्यवारयदच्युतम् ॥ १
एकीभूताः पुनश्चैव तव पुत्रा महारथाः ।

°श्वात्तु; D1 °श्वात्स्व°. Da1 D5 हताश्वात्तुरगात्तूर्णम्; T2 हताश्वसारथिस्तूर्णम्. — ^{b}) T2 अभिप्लुत्य. M1. 3. 5 महाबलः (for °रथः). — K2 om. (hapl.) 67^{c}–69^{d}. — ^{c}) M4 रथं तूर्णम् (for महाबाहुर्). — ^{d}) M4 महात्मनः (for महारथम्).

68 K2 om. 68 (cf. v. l. 67). — ^{a}) D3. 6 सनर° (for सरथ°). — ^{b}) K4 B1. 2. 4 समाकंपत; Da1 समे°. B3 D3 (before corr.) मेदिनी; Da1 T1 M4 वाहिनीं. — After 68^{ab}, K5 D3 *repeat* 60^{ab}. — ^{c}) D3 (*sup. lin.* as in text) भीमसेनेन (for °सेनस्य). — ^{d}) Ś1 Ko. 1. 4 T1 G धीमतः (for पश्यतः). D1 तथैव पार्षतस्य च.

69 K2 om. 69 (cf. v. l. 67). — ^{a}) G3 तत्र भग्नं. K3. 5 D2 S राजन् (G3 राजा) (for दृष्ट्वा). — ^{b}) Ś1 द्रोणेन मिततेजसा; Da Dn1 D5 S द्रोणेनामित्रकर्शिना; D6 रणेनामित्रतेजसा. — ^{c}) Ko. 1 स्थापयितुं; K5 D2. 3 S (except T1 G4) धार°; D5 तार°. — ^{d}) D1 नराधिपाः (for महारथाः).

70 Ś1 om. 70. — ^{a}) T2 वध्यमानास् (for वध्यमानं). S समरे (for तत्सैन्यं). — ^{c}) K3. 5 D2 अभ्यद्रवत; D3. 5. 6 T2 व्यभ्रमंस्तत्र; D4 (before corr.) व्यधमत्तत्र; G1. 3 व्यद्रवत्तत्र. K5 तास्तेव (for तत्रैव). — ^{d}) Ko. 2 Dn2 D1. 3. 6–8 T2 क्षोभ्यमान. D6 इवार्णवाः.

71 ^{a}) D3. 6 तथा च दृष्ट्वा; T G M3. 5 तथा तु दृष्ट्वा; M1. 4 तथा दृष्ट्वा तु; M2 तथैव दृष्ट्वा (for तथा दृष्ट्वा च). — ^{b}) D1 प्रहृष्टं च; D5 जहृषे न; D6 जहृषुश्च; S जहृषे (G1. 3 °हर्षे; G2 °गृहे) वै. Ko–2. 5 D2 जहृषे (D2 °हर्षे) तावकं बलं. — ^{c}) K3. 5 B1 Dn2 D2 सुसंक्रुद्धं; Da Dn1 D5 तु संक्रुद्धं; T1 G ततः क्रुद्धं. — ^{d}) K3. 5 Da Dn D3–8 S तपंतं; B D2 पतंतं (for दहन्तं). T1 G M2 अरि°; M1. 3–5 इव (for रिपु°). — ^{e}) T1 G तुष्टुवुः; T2 ददृशुः (for चुक्रुशुः). Ś1 सर्वशो (for सर्वतो). Ś1 Ko–2 राजन्; S (mostly) यौधाः. — ^{f}) B1 चाभवन् (for भारत).

Colophon om. in Ś1. — *Sub-parvan*: Omitting sub-parvan name, Ko–2 D2 mention only षष्ठे (D2 °ष्ठ-) युद्धदिवसे; K4 षष्ठेह्नि; D6 षष्ठे; M4 षष्ठेह्निके. — *Adhy. name*: D6 धृष्टद्युम्नपराजयः; T2 M1. 2 द्रोणयुद्धं. — *Adhy. no.* (figures, words or both): Da2 (marg. *sec. m.*) 35; Dn2 M3. 4 T2 74; T1 G 72; M1. 2 73 (as in text); M5 75. — *Śloka no.*: Dn1 85; Dn2 76; D5 75.

74

1 Da om. the ref. — ^{b}) K4 पुनः; K5 तथा (for तदा). — ^{d}) G1–3 M पर्य° (for प्रत्य°). Ś1 Ko. 1. 4 B2 D6 T2 M1 अच्युतः; K3 B3 D3 अच्युत.

2 ^{a}) K3. 5 D2. 7 ततश्चैव (for पुन°). — ^{b}) Ś1 तव पुत्र-; Ko. 2 तत्र तत्र; K1 तत्र पुत्रा. — ^{c}) Ś1

समेत्य समरे भीमं योधयामासुरुद्यताः ॥ २
भीमसेनोऽपि समरे संप्राप्य स्वरथं पुनः ।
समारुह्य महाबाहुर्ययौ येन तवात्मजः ॥ ३
प्रगृह्य च महावेगं परासुकरणं दृढम् ।
चित्रं शरासनं संख्ये शरैर्विव्याध ते सुतान् ॥ ४
ततो दुर्योधनो राजा भीमसेनं महाबलम् ।
नाराचेन सुतीक्ष्णेन भृशं मर्मण्यताडयत् ॥ ५
सोऽतिविद्धो महेष्वासस्तव पुत्रेण धन्विना ।
क्रोधसंरक्तनयनो वेगेनोत्क्षिप्य कार्मुकम् ॥ ६
दुर्योधनं त्रिभिर्बाणैर्बाह्वोरुरसि चार्पयत् ।
स तथाभिहतो राजा नाचलद्गिरिराडिव ॥ ७
तौ दृष्ट्वा समरे क्रुद्धौ विनिघ्नन्तौ परस्परम् ।
दुर्योधनानुजाः सर्वे शूराः संत्यक्तजीविताः ॥ ८
संस्मृत्य मन्त्रितं पूर्वं निग्रहे भीमकर्मणः ।
निश्चयं मनसा कृत्वा निग्रहीतुं प्रचक्रमुः ॥ ९
तानापतत एवाजौ भीमसेनो महाबलः ।
प्रत्युद्ययौ महाराज गजः प्रतिगजानिव ॥ १०
भृशं क्रुद्धश्च तेजस्वी नाराचेन समर्पयत् ।

C. 6. 3423
B. 6. 78. 11
K. 6. 78. 11

ससैन्यं; D1 समंतात् (for समेत्य). T2 G1. 2 M वीरं; G3 शूरं (for भीमं). — d) K0-2 उद्धृताः (for उद्यताः).

3 a) T2 °सेनस्तु (for °सेनोऽपि). T2 M संग्रामे (for समरे). — b) K1 स प्राप्य; S प्राप्य वै (T2 प्राप्यैव) (for संप्राप्य). K0. 2 B1 सुरथं; K5 च स्वयं; B3 स्वबलं (for स्वरथं): B3 ततः; T2 प्रति (for पुनः). — c) B3 समभ्येत्य (for समारुह्य). D1 ययौ तत्र (for महाबाहुर्). — d) B Da Dn D3. 4 m. 5. 7 T G1 यत्र; D4 (before corr.). 8 तत्र; G2 M1-3. 5 तेन (for येन). K0-2 G2 M1-3. 5 तवात्मजान्; K3 D2. 3 M4 °त्मजाः. D1 यत्रासंततरात्मजाः (sic).

4 a) D1 प्रसृह्य (for प्रगृह्य). K0. 2 महानादं; K1 °नंद; B1 Dn2 D4. 7. 8 °वेगः; D1 °चापं; T2 °बाहुः. — b) D1. 3 परासुहरणं; Cd °करणं (as in text). — c) K3. 5 D2 सज्जं; M4 दिव्यं (for चित्रं). S (mostly) संखे. D1 चित्रपुंखैः शितैर्बाणैः. — d) M1-3. 5 प्रतिविव्याध (for शरैर्वि°). K4 B Da Dn D2. 4. 5. 7. 8 ते सुतं; D6 तेर्भकान्. D1 स विव्याध तवात्मजान्.

5 D2 reads (sec. m.) 5 in marg. — a) B2-4 Da2 Dn D4. 5. 7. 8 (before corr.) M2 राजन् (for राजा). — b) Ś1 K0-2. 4 महात्म(K2 °त्म)नाः; M1-3. 5 महारथं (for °बलम्). — d) K0. 2 D6 G1. 3 मर्मण्यता° (G3 मर्माभ्यता°); D1 M मर्मस्वता°; T2 मर्मसु ता°.

6 a) B3 D3 सोपि (for सोऽति-). — b) K0. 3. 5 D1. 2 T2 धीमता (for धन्विना). — c) B2 क्रोधरक्तांतनयनो; Dn2 D4. 7. 8 संर(D4 before corr. °स)क्तनयनः क्रोधाद्; D1 क्रोधात्स रक्तनयनो. — d) K3-5 D1. 6 G2 वेगेनाक्षिप्य; B Da Dn D4. 5. 7. 8 वेगादा(B3 °गेना)कृष्य; D3 जीवेना(marg. sec. m. बलेन)क्षिप्य.

7 a) M5 दुर्योधनसं. — b) Ś1 K1. 2. 5 G1. 3 चार्दयत्. — c) K3. 5 Dn2 D2 स तत्र शुशुभे; Da1 *** र्निहते; D1. 6 स तत्राभिहतो; D4 स तथा निहतो; T2 G स तदाभि°. B Da Dn1 D4. 5. 7. 8 राजन् (for राजा). M1-3. 5 स तथा प्रतिविद्धस्तु. — d) K3. 5 Dn2 D2 शिखरैर्; B3 न चेलद्; Da1 D5 न चलद् (for नाचलद्).

8 a) K0-2 सहितौ (for समरे). M2 क्रुद्धो. — b) D1 निघ्नंतौ च (for विनि°). — c) Ś1 D3 °नुगाः (for °नुजाः). — d) B3 °जीविनः (for °जीविताः).

9 a) T1 G M1-3. 5 स(M3. 5 सं)स्मरन्; T2 तैः कृतं; M3 (inf. lin.) संस्मृतं (for संस्मृत्य). K3 मंत्रिभिः; K5 मन्त्रितैः; B2 मन्त्रूतं (sic) (for मन्त्रितं). — b) K0-2 विग्रहं; Da1 D5 निगृही; D1 यत्कृतं; G3 समरे (for निग्रहे). — c) K3. 4 B Da Dn D3-8 परमं (for मनसा). D1 ततस्ते निश्चयं कृत्वा. — d) K0. 2. 5 Dn D3. 4. 8 निगृहीतुं; K3 निग्रहितुं. K4 प्रचक्रमे. T G M1-3. 5 निग्रहे (T1 G4 °हं) समुपाक्रमन् (T2 °पाकृतं; M5 °पाश्रमन्); M4 गृहीतुमुपचक्रमुः.

10 a) K0. 2 तानातपत (by metathesis); D2 तानापततम्; T2 °पतंतम्. K1 एवासु; K2 D1 एवासौ. — b) K4 महारथः (for °बलः). — c) Dn2 D4. 7. 8 अभ्युद्ययौ (for प्रत्यु°). G2. 3 M1. 3. 5 महाराजा. — K3 om. (hapl.) 10d-11a. — d) D1 गजं प्रतिगजो यथा.

C. 6. 3423
B. 6. 78. 11
K. 6. 79. 11

चित्रसेनं महाराज तव पुत्रं महायशाः ॥ ११
तथेतरांस्तव सुतांस्ताडयामास भारत ।
शरैर्बहुविधैः संख्ये रुक्मपुङ्खैः सुवेगितैः ॥ १२
ततः संस्थाप्य समरे स्वान्यनीकानि सर्वशः ।
अभिमन्युप्रभृतयस्ते द्वादश महारथाः ॥ १३
प्रेषिता धर्मराजेन भीमसेनपदानुगाः ।
प्रत्युद्ययुर्महाराज तव पुत्रान्महाबलान् ॥ १४
दृष्ट्वा रथस्थांस्ताञ्शूरान्सूर्याग्निसमतेजसः ।
सर्वानेव महेष्वासान्भ्राजमानाञ्श्रिया वृतान् ॥ १५
महाहवे दीप्यमानान्सुवर्णकवचोज्ज्वलान् ।
तत्यजुः समरे भीमं तव पुत्रा महाबलाः ॥ १६
तान्नामृष्यत कौन्तेयो जीवमाना गता इति ।
अन्वीय च पुनः सर्वांस्तव पुत्रानपीडयत् ॥ १७
अथाभिमन्युं समरे भीमसेनेन संगतम् ।
पार्षतेन च संप्रेक्ष्य तव सैन्ये महारथाः ॥ १८
दुर्योधनप्रभृतयः प्रगृहीतशरासनाः ।

---

11 K3 om. 11abc (cf. v. l. 10). — a) K0. 1 च क्रुद्धस्; D1 क्रुद्धस्तु; G3 क्रुद्धेन (for क्रुद्धश्च). — b) Ś1 K0–2. 5 समर्दयत्; K4 B Da2 Dn1 (before corr.). n2 D2–8 समार्पयत्; D1 स्तनांतरे (for समर्पयत्). — d) B3 महाबलः; T1 G4 महारथः (for °यशाः).

12 a) K0. 1 रथेतरांस्; K3 तथै°; B4 अथे°. D1 तथा तव सुतान्सर्वांस्. — b) M4 छाद° (for ताड°). M4 मारिष (for भारत). — c) T2 बहुविधं. S (mostly) संखे. — d) M रुक्मपुंखैः. K3–5 D1–3. 7 S सुतेजनैः (D1. 2 °सैः); B1 प्रवेशितैः; B2 शिलासितैः (for सुवेगितैः).

13 a) S संप्रेक्ष्य (for संस्थाप्य). T1 G4 पुत्रैस्ते (for समरे). — b) K3–5 B1. 3. 4 Da1 Dn1 D2 तान्य° (for स्वान्य°). D1 भागशः (for सर्वशः). T1 G4 भीमसेनं समावृतं. — d) B3 शूरा दश; D1 द्वादशैते (for ते द्वादश).

14 a) K2 प्रेषता (for प्रेषिता). S धर्मपुत्रेण. — b) Ś1 °परानुगाः. — c) K3. 5 D2 प्रतिजग्मुर्; S समुद्ययुर्. Ś1 महाराजा. — d) Dn2 D4 (before corr.). 7 राजपुत्रान्; D1 G1. 3 तव पुत्रा; D4 (by corr.). 8 राजपुत्रा; D6 G2 तव पुत्रं (for तव पुत्रान्). Ś1 K0–3 महारथान्; D1 °रथाः; D4 (by corr.). 8 T1 G °बलाः.

15 D3 om. 15. — a) K0–2 सर्वान्; D1 वीरान् (for शूरान्). T1 G दृष्ट्वा प्रासाग्रयस्थांस्तान्; T2 दृष्ट्वा रथस्थांस्थांच्छूरान् (sic). — b) D6 सूर्याग्निरिव तेजसा; G2 °समतेजसं. — c) B2 सर्वाणीव. — d) Da1 Dn1 राजमानान् (for भ्राज°). D2. 6 श्रियान्वितान्.

16 a) M4 दीर्यमाणान् (for दीप्यमानान्). — b) K0 °कवचोज्ज्वलाः; K4 B4 Da2 Dn1 °मुकुटोज्ज्वलान्; B1. 2 C0 °विकटो°; B3 Dn2 D4. 7. 8 °विकचो°; D2 S (except T1) °कनको° (for °कवचो°). Da1 मुकुटो कुंडलै ज्वलन् (sic); D5 मुकुटो कुंडलै कृतान् (sic). — d) Ś1 K0–2. 4 T1 G1. 2. 4 महारथाः; M2 महाबलान्. D1 मृत्युरूपं दुरासदं.

17 a) K0 D3 तान्न मृष्यत; K2. 3 D6 G1–3 M2. 3. 5 तन्ना(K2 तन्न; K3 तन्ना-; D6 ताना)मृष्य(G3 °ष्यं)त; K5 Da2 D5 तान्नामृषत; B3 Dn1 तन्ना(Dn1 ताना)-मृषत; Da1 तान्नामृषन् (submetric); T2 न सेहे तत्र (for तान्नामृष्यत). — b) Ś1 जीवमानान्; D5 °याना; G3 जीवदान- (for जीवमाना). Ś1 D1 गतान्; K2 गजा (for गता). D6 इव (for इति). — After 17ab, K2 B4 Dn2 D4. 7. 8 ins. an addl. colophon, followed by संजय उवाच. — c) B3 अवतीर्य; T2 अन्वीय तु; G3 अन्वियाय (for अन्वीय च).

18 a) Ś1 K2 अथाभिमन्यु (sic); K0. 1. 5 T2 M अथाभिमन्युः; B Da Dn D4. 5. 7. 8 अभिमन्युश्च (B2 Da Dn1 °न्युं च); D1. 6 T1 G तथाभिमन्युः (D1. 6 °न्युं). — b) Ś1 S संगतः; B Da Dn D4. 7. 8 संयुतः (B3 °यतः; Da Dn1 °युतं). K0–2 भीमसेनमलंकृतः. — c) Ś1 संयोक्ष्य; K3 संप्रेष्य; B1 राजेंद्र; S ते सर्वे (for संप्रेक्ष्य). — After 18abc, S ins.:

311* केकया द्रौपदीसुताः ।
तान्दृष्ट्वा समरे क्रुद्धास्

[(L. 2) T2 M1 क्रुद्धांस्.]

— d) K0. 1 M4 तव सैन्यं; K3 तव सैन्येन (hypermetric); B3 D1. 2 G1 तव सैन्य-; D3. 6 G3 तव सैन्या.

19 K5 om. 19ab. — a) D5 रथमन्यैः; D3 (marg. sec. m. as in text) रथमख्यैः; M1–3. 5 रथं चाश्वैः

भृशमश्वैः प्रजवितैः प्रययुर्यत्र ते रथाः ॥ १९
अपराह्ने ततो राजन्प्रावर्तत महात्रणः ।
तावकानां च बलिनां परेषां चैव भारत ॥ २०
अभिमन्युर्विकर्णस्य हयान्हत्वा महाजवान् ।
अथैनं पञ्चविंशत्या क्षुद्रकाणां समाचिनोत् ॥ २१
हताश्वं रथमुत्सृज्य विकर्णस्तु महारथः ।
आरुरोह रथं राजंश्चित्रसेनस्य भास्वरम् ॥ २२
स्थितावेकरथे तौ तु भ्रातरौ कुरुवर्धनौ ।
आर्जुनिः शरजालेन छादयामास भारत ॥ २३
दुर्जयोऽथ विकर्णश्च कार्ष्णिं पञ्चभिरायसैः ।
विव्यधाते न चाकम्पत्कार्ष्णिर्मेरुरिवाचलः ॥ २४
दुःशासनस्तु समरे केकयान्पञ्च मारिष ।
योधयामास राजेन्द्र तदद्भुतमिवाभवत् ॥ २५
द्रौपदेया रणे क्रुद्धा दुर्योधनमवारयन् ।
एकैकस्त्रिभिरानर्छत्पुत्रं तव विशां पते ॥ २६
पुत्रोऽपि तव दुर्धर्षो द्रौपद्यास्तनयान्रणे ।
सायकैर्निशितै राजन्नाजघान पृथक्पृथक् ॥ २७
तैश्चापि विद्धः शुशुभे रुधिरेण समुक्षितः ।
गिरिप्रस्रवणैर्यद्वद्गिरिर्धातुविमिश्रितैः ॥ २८
भीष्मोऽपि समरे राजन्पाण्डवानामनीकिनीम् ।

C. 6. 3441
B. 6. 78. 29
K. 6. 78. 29

(for भृशमश्वैः). B2 प्रगृहीतैः; D6 प्रव्रजितैः. T2 रथैरश्वैर्गजैश्चैव. — d) M4 तत्र (for यत्र).

20 a) Some MSS. अपराह्णे. K3. 4 S महाराज (for ततो राजन्). — b) K0. 3. 4 B1. 3. 4 Da Dn1 D1–3. 5. 6 महारणः; K1 महारथः; S जनक्षयः. — c) S समरे (for बलिनां).

21 a) K2 Da1 विकर्णश्च. — b) Ś1 हव (sic) (for हत्वा). K3–5 B Da Dn D2–8 G1. 3 महाहवे; D1 रणाजिरे; T G2. 4 M महामृधे (for महाजवान्). — d) K0 क्षुरकानां; A few MSS. क्षुद्रकानां. Ca cites क्षुद्रकाः. K3. 5 D1. 2 S सम(K5 D1. 2 °मा)र्पयत् (for समाचिनोत्).

22 b) K3 सु-; D1 स (for तु). — c) D1 तूर्णं; S भ्रातुश्च (G1. 3 प्राहुश्च) (for राजंश्च). — d) K0 B1–3 भासुरं; K3 D1 T2 भारत (for भास्वरम्). — After 22, T1 G4 M read 25^{cd} (for the first time), *repeating* it in its proper place.

23 T2 G1–3 om. 23^{a}–25^{b}. — a) D1 चैवं (for तौ तु). — b) D2. 3. 6 कुल° (for कुरु°). — c) K3 G4 M1. 2. 4. 5 आर्जुनिं; Da1 अर्जुनः; D4 अर्जुनिः; T1 M3 अर्जुनिं. B Da Dn D4. 5. 7. 8 शरवर्षेण. — d) K3 छादयामासतुस्तदा; D1 °मास तावुभौ; T1 G4 M °मासतू रणे.

24 T2 G1–3 om. 24 (cf. v. l. 23). — a) K5 D3. 6 चित्रसेनो; D1 दुर्जयश्च (for दुर्जयोऽथ). K6 विकर्णस्य. — b) K2 कार्ष्णि-; K5 कार्ष्णिः; Co °र्ष्णि (as in text). D1 M आशुगैः (for आयसैः). — c) Ś1 K0–2 विव्याध तेन नाकंपत्; T1 G4 M3 (*inf. lin.*), 4 विध्वा नाकंपयद्राजन्; M1–3. 5 विध्वा नाकंपयेतां तु. — d) Ś1 K5 Da1 D7 कार्ष्णि-; K3 कार्ष्णीर्. K4 B3 Da1 D5 इवास्थितः (K3 °ता); K5 B1. 2. 4 Da2 Dn D3. 4. 7. 8 इव स्थितः. T1 G4 M मैनाकमिव पर्वतं.

25 T2 G1–3 om. 25^{ab} (cf. v. l. 23). — b) M4 केकयाः (for °यान्). D1 भारत (for मारिष). — T1 G4 M read 25^{cd} (for the first time) after 22, *repeating* it here. — c) D1 च तदा; S (T1 G4 M both times) समरे (for राजेन्द्र). — d) K3 तदद्भुतमिवा°.

26 a) Ś1 K0–2. 4 तथा पञ्च (for रणे क्रुद्धा). — b) K1. 2 D8 M1 अवारयत्; G1–3 उपाद्रवन्. — c) K4 B2–4 D4. 7. 8 एकैकं (for एकैकस्). B2–4 आनर्छन्. K3. 5 B1 Da Dn1 D1–3. 5. 6 S श(G3 शि)रैराशीविषाकारैः.

27 a) D1. 3. 6 हि (for ऽपि). Dn2 दुर्धर्षान्. — b) D1 द्रौपदेयान्महारथान्. — cd) Ś1 बाणैर्; D1 तीक्ष्णैर् (for राजन्). K6 अजंघान (sic). S एकैकं त्रिभिरानर्छच्छरैरग्निशिखोपमैः.

28 a) K2 G2 तैश्चाप-; D3. 6 स चापि; D8 (*marg. sec. m.*) G1. 3 M2. 4 स चाति-. T1 G तेजस्वी (for शुशुभे). — b) D1 समुत्क्षितः; D5 समक्षितः; S [अ]वसेचितः. — c) K1. 2. 5 D1. 2. 4. 6. 8 M1. 3. 5 गिरिः; K4 सरित् (for गिरि-). Dn2 -प्रस्रवणे; T G M4 -प्रस्रवणो; Ca -प्रस्रवणैर् (as in text). Ś1 K0–2 युक्तो (for यद्वद्). — d) K B1. 2. 4 Da Dn D3–5 M1–3. 5 गिरिधातुविमिश्रितैः; B3 गिरिर्धातुविमिश्रितः; D1 समंताद्धातुविस्रवैः; D2 गैरिकादिविमिश्रितैः; T G

C. 6. 3442
B. 6. 78. 29
K. 6. 78. 19

कालयामास बलवान्पालः पशुगणानिव ॥ २९

ततो गाण्डीवनिर्घोषः प्रादुरासीद्विशां पते ।
दक्षिणेन वरूथिन्याः पार्थस्यारीन्विनिघ्नतः ॥ ३०

उत्तस्थुः समरे तत्र कबन्धानि समन्ततः ।
कुरूणां चापि सैन्येषु पाण्डवानां च भारत ॥ ३१

शोणितोदं रथावर्तं गजद्वीपं हयोर्मिणम् ।
रथनौभिर्नरव्याघ्राः प्रतेरुः सैन्यसागरम् ॥ ३२

छिन्नहस्ता विकवचा विदेहाश्च नरोत्तमाः ।
पतितास्तत्र दृश्यन्ते शतशोऽथ सहस्रशः ॥ ३३

निहतैर्मत्तमातङ्गैः शोणितौघपरिप्लुतैः ।
भूर्भाति भरतश्रेष्ठ पर्वतैराचिता यथा ॥ ३४

तत्राद्भुतमपश्याम तव तेषां च भारत ।
न तत्रासीत्पुमान्कश्चिद्यो योद्धुं नाभिकाङ्क्षति ॥ ३५

एवं युयुधिरे वीराः प्रार्थयाना महद्यशः ।
तावकाः पाण्डवैः सार्धं काङ्क्षमाणा जयं युधि ॥ ३६

इति श्रीमहाभारते भीष्मपर्वणि चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

M_4 गिरिधातुविचित्रितः.

29 ^{b}) B D (except D_2) वरूथिनीं (for अनीकिनीम्). — ^{c}) D_1 कल°; T_2 कार°; $G_{2.4}$ ताड° (for काल°). $Ś_1$ भगवान्; D_8 समरे (for बलवान्). — ^{d}) B_8 G_8 कालः; D_1 क्षुद्रः (for पालः). $Ś_1$ D_8 पांशुगणान्; Cd पशु° (as in text). D_5 पशुपालगणानिव.

30 ^{a}) A few MSS. गांजीव°. — ^{c}) K_8 Da_1 Dn_1 $D_{1-3.6}$ वरूथिन्या; T_2 °थिन्यान्. — ^{d}) $Ś_1$ K_3 B_8 D_2 पार्थस्यासीद्; S कुरून्राजन्.

31 ^{a}) Da_1 उत्तस्थूः; T_2 उत्तरः (for उत्तस्थुः). Da Dn_1 D_5 राजन् (for तत्र). — ^{b}) K_{0-2} कवंधाश्च (for कबन्धानि). B D (except $D_{1.2.7}$) T_2 M सहस्रशः (for समन्ततः). — ^{c}) $K_{3.5}$ B D_2 S चैव (for चापि). T_2 सर्वेषां (for सैन्येषु).

32 K_0 om. 32^{ab}. — ^{a}) $K_{2.4}$ B Da Dn $D_{4.7.8}$ शरावर्तं; K_8 $D_{2.6}$ महावर्तं (for रथा°). K_5 शोणितोदां महावर्तां; D_1 शोणितोद्गदावर्तां. — ^{b}) K_1 राजद्वीपं; K_8 Da_1 गजद्विपं. $Ś_1$ महोर्मिणं; M_4 रथो° (for हयोर्मिणम्). K_5 गजद्विपहयोर्मिणः; D_1 राजन्रथहयोर्मिणीं. — ^{c}) T_2 रथनौभिर्; $G_{1.2}$ °नाभिर्; G_8 °नार्भि (for °नौभिर्). D_1 रथिनो बद्धसंनाहा. — ^{d}) K_1 प्रेतेन्यु (sic); Da_1 प्रेतेरु (sic); D_6 प्रातरु (sic) (for प्रतेरुः). D_1 तरतीं च महानदीं.

33 ^{a}) T G M_4 भिन्न° (for छिन्न°). K_8 छिन्नहस्तादिकवचा. — ^{b}) D_1 द्रोणेन निहता रणे. — ^{c}) $K_{3.5}$ Dn_2 $D_{2.8}$ transp. पतितास्तत्र and दृश्यन्ते. K_4 ह्यत्र (for तत्र). S अदृश्यन्पतितास्तत्र. — ^{d}) $Ś_1$ हताशेष°; K_{0-2} ह(K1 हा)तशेषाः (for शतशोऽथ).

34 ^{b}) K_{0-2} D_1 M_4 शोणितो($K_{0.1}$ M_4 °तौ)घपरिप्लुता; K_8 T_2 शोणितैश्च परिप्लुतैः (T_2 °ताः); G_2 शोणितोघ°; M_1 (*inf. lin.* as in text).$_{2.3.5}$ शोणितौ(M_5 °तो)घपरिच्छदैः. — ^{c}) $K_{3.5}$ $D_{2.3.6}$ बभौ भूर् (for भूर्भाति). G_{1-3} भारतश्रेष्ठ. — ^{d}) G_8 पतितैर् (for पर्वतैर्). D_1 निचिता; D_2 आवृता (for आचिता). Da_1 पर्वतो रचिता यथा (sic).

35 ^{a}) K_8 तत्राद्भूतम्; D_5 तत्प्राश्रुतम्. $D_{1.3.6}$ G_3 अपश्यामस् (for °श्याम). — ^{b}) K_{0-2} तावकानां (for तव तेषां). $Ś_1$ K_{0-2} मारिष (for भारत). — ^{c}) B_2 न तदासीत्. — ^{d}) K_{2-4} B Da_1 Dn D_8 T G यो युद्धं; K_5 यो युद्धे; D_4 यो योद्धं; D_6 युद्धं यो; M_3 (*sup. lin.*).$_5$ नो युद्धं (for यो योद्धुं). K_1 नाभिकाक्षती (sic); B_4 Da Dn $D_{4.5.7.8}$ $G_{2.4}$ $M_{1.3-5}$ नाभिकांक्षते; D_8 नाभ्यकांक्षत.

36 ^{a}) $M_{3.5}$ युधिष्ठिरे (for युयुधिरे). — ^{d}) K_1 कांक्षिमाणा; K_{3-5} D_2 आकांक्षंतो (for काङ्क्षमाणा). K_1 युधिष्ठिरः; S रणे जयं (for जयं युधि).

Colophon om. in $Ś_1$. — *Sub-parvan :* Omitting sub-parvan name, K_{0-2} D_2 mention only षष्ठे युद्धदिवसे; K_4 Da Dn_1 D_5 T_2 षष्ठेह्नि; D_6 षष्ठेहनि; M_4 षष्ठेह्निके. — *Adhy. name :* T_2 G_2 $M_{1.2}$ संकुलयुद्धं. — *Adhy. no.* (figures, words or both): Da_2 36; Dn_2 M_5 76; D_1 (marg.) 77 (corrected to 78 and cancelled); D_6 T_1 G 73; T_2 $M_{3.4}$ 75; $M_{1.2}$ 74 (as in text). — *Śloka no.:* Dn_1 $D_{5.6}$ 36.

७५

संजय उवाच ।

ततो दुर्योधनो राजा लोहितायति भास्करे ।
संग्रामरभसो भीमं हन्तुकामोऽभ्यधावत ॥ १
तमायान्तमभिप्रेक्ष्य नृवीरं दृढवैरिणम् ।
भीमसेनः सुसंक्रुद्ध इदं वचनमब्रवीत् ॥ २
अयं स कालः संप्राप्तो वर्षपूगाभिकाङ्क्षितः ।
अद्य त्वां निहनिष्यामि यदि नोत्सृजसे रणम् ॥ ३
अद्य कुन्त्याः परिक्लेशं वनवासं च कृत्स्नशः ।
द्रौपद्याश्च परिक्लेशं प्रणोत्स्यामि हते त्वयि ॥ ४
यत्त्वं दुरोदरो भूत्वा पाण्डवानवमन्यसे ।
तस्य पापस्य गान्धारे पश्य व्यसनमागतम् ॥ ५
कर्णस्य मतमाज्ञाय सौबलस्य च यत्पुरा ।
अचिन्त्य पाण्डवान्कामाद्यथेष्टं कृतवानसि ॥ ६
याचमानं च यन्मोहाद्दाशार्हमवमन्यसे ।
उलूकस्य समादेशं यद्ददासि च हृष्टवत् ॥ ७
अद्य त्वा निहनिष्यामि सानुबन्धं सबान्धवम् ।
समीकरिष्ये तत्पापं यत्पुरा कृतवानसि ॥ ८
एवमुक्त्वा धनुर्घोरं विकृष्योद्भ्राम्य चासकृत् ।

C. 6. 3458
B. 6. 79. 9
K. 6. 79. 9

75

1 a) Ś1 D1–3. 6 M4 संग्रामे रभसो (D1 रभसा ; D2 रभसं ; M4 तरसा) ; Cc. d संग्राम° (as in text). — d) T1 G1. 3. 4 [ऽ]भ्यवर्तत (for ऽभ्यधावत).

2 a) M5 °प्रेत्य (for °प्रेक्ष्य). — b) K2 नृवीर ; D1 नृवरं ; D5 तृतीयं ; T2 नृवैनं ; G2 नृवीराद् (for नृवीरं). Ś1 K0. 1 T2 दृढधन्विनं ; K3 °विक्रमं ; G3 रथवैरिणं. — c) Da1 भीमसेनं (for °सेनः). Ś1 तु (for सु-). D1 भीमः कोपात्सुसंरब्ध.

3 Before 3, D6 ins. भीमसेन उवाच. — a) K3 कालः स (by transp.). G2 प्राप्तो वा (for संप्राप्तो). — b) K2 वर्षपूगाभिवांछितः ; K3 B2 D1. 2 °पूगाभि- (D1 °तु)चिंतितः ; K4 damaged ; K5 °पूगाभिसंचितः ; G2 °पूगाहिकांक्षितः (sic). — B4 om. (hapl.) 3^{cd}. — c) D3. 6 T1 G अहं (for अद्य). K1 D8 T2 त्वा (for त्वां). T2 न निवर्तिष्ये (for निहनिष्यामि). — d) K0–3. 5 नोत्सृज्यसे (K5 °ते) ; K3 नोत्सृज रे ; T2 °जते (for नोत्सृजसे). B1 रणे. D1 पुरुषो भव दुर्मते.

4 D1 om. 4^{a}–8^{b}. — a) S अहं (for अद्य). — B1 om. (hapl.) 4^{bc}. — b) Ś1 कृत्स्नयः. — d) K2. 4 B2 D2. 6 S प्रणे(M4 विने)ष्यामि ; K5 D3 Cc प्रणेत्स्या(K5 °स्या)मि ; D5 प्रणेप्स्यामि ; D8 प्राणोत्स्यामि ; Cd प्रणो° (as in text). B1 मृते (for हते). G3 मयि (for त्वयि).

5 D1 om. 5 (cf. v. l. 4). — a) Cd दुरो° (as in text). Ś1 K3 यत्त्वं (K3 °स्त्वं) दुरोदरं कृत्वा ; K0. 1 यत्त(K1 °त्तु)त्पुरामरो भूत्वा ; K2. 4 B1. 2. 4 D8 Dn D4. 5. 7. 8 यत्पुरा मत्सरो (K4 B2. 4 °री) भूत्वा ; K5 यत्पुरा नमरो भूत्वा ; D2. 3 यत्तत्पुरा नरो (D3 °राज-मरो) भूत्वा ; D6 यत्तत्पुरा मत्सभूय ; T G यत्तत्पु(T2 यस्त्वं पु)राकृतं स्मृत्वा ; M यत्त्वं पु(M5 प)रामरं स्मृत्वा ; text as in B3. — b) G3 अभि° (for अव°). — M1. 3. 5 om. (hapl.) 5^{c}–7^{b}. — c) K5 गंधारे.

6 D1 M1. 3. 5 om. 6 (cf. v. l. 4, 5). — a) T2 बलम् (for मतम्). K3–5 B D (except D2. 6 ; D1 om.) आस्थाय (for आज्ञाय). — b) D5 मत्पुरा. — c) D6 अवंचत् ; M4 अचिंत्यान् (for अचिन्त्य). Ś1 D6 कामं ; K0 T1 G2. 4 कामान् ; D5 कामा (for कामाद्). — d) K1 कृतवानपि.

7 D1 om. 7 (cf. v. l. 4). M1. 3. 5 om. 7^{ab} (cf. v. l. 5). — a) M4 याचमानश्च (for °मानं). K1 च यं ; Dn1 ब्रुवन् (for च यन्). — b) K1 दाशार्हम् ; Da1 दशार्हम्. — T2 om. 7^{cd}. — c) Da1 च मादेशं ; T2 G च संदेशं (for समादेशं). Ca as in text. — d) K0–2 न (for च). K1 M3. 5 हृष्टवान्.

8 D1 om. 8^{ab} (cf. v. l. 4). — a) K2 अद्य त्वां ; K4 B Da Dn D4. 5. 7. 8 तेन त्वां. K3. 5 D3 निहत्य तेन त्वां मूढ ; D6 निहत्य त्वां मूढबुद्धे ; S त्वां (G3 त्वा) निहत्याद्य (T2 °द्यै) समरे. — b) K3 सु- (for स-). M3 सानुजं सानुबांधवं. — c) Ś1 K3. 4 B2. 3 Da Dn D1. 4. 8 शमी° ; D5 समा° ; D6 समं (for समी°). K1 Da1 पाप (for पापं).

C. 6.3458
B. 6.79.9
K. 6.79.9

समादाय शरान्घोरान्महाशनिसमप्रभान् ॥ ९
षड्विंशत्तरसा क्रुद्धो मुमोचाशु सुयोधने ।
ज्वलिताग्निशिखाकारान्वज्रकल्पानजिह्मगान् ॥ १०
ततोऽस्य कार्मुकं द्वाभ्यां सूतं द्वाभ्यां च विव्यधे ।
चतुर्भिरश्वाञ्जवनाननयद्यमसादनम् ॥ ११
द्वाभ्यां च सुविकृष्टाभ्यां शराभ्यामरिमर्दनः ।
छत्रं चिच्छेद समरे राज्ञस्तस्य रथोत्तमात् ॥ १२
त्रिभिश्च तस्य चिच्छेद ज्वलन्तं ध्वजमुत्तमम् ।
छित्त्वा तं च ननादोच्चैस्तव पुत्रस्य पश्यतः ॥ १३
रथाच्च स ध्वजः श्रीमान्नानारत्नविभूषितः ।
पपात सहसा भूमिं विद्युज्जलधरादिव ॥ १४
ज्वलन्तं सूर्यसंकाशं नागं मणिमयं शुभम् ।
ध्वजं कुरुपतेश्छिन्नं ददृशुः सर्वपार्थिवाः ॥ १५
अथैनं दशभिर्बाणैस्तोत्त्रैरिव महागजम् ।
आजघान रणे भीमः स्मयन्निव महारथः ॥ १६
ततस्तु राजा सिन्धूनां रथश्रेष्ठो जयद्रथः ।

---

9 Before 9, D6 ins. संजय उवाच. — b) K5 D2 विक्षिप्योत्क्रम्य; T1 G विकृष्यानम्य; M5 विकृष्योत्क्रम्य. K2 Da1 बासकृत्. — c) K3.5 D2.6 M समा(M4 तदा)दत्त; D7 T G4 समाधत्त; G1 समदत्त; G2.3 समधत्त (G3 °त्तः) (for समादाय). D1 समान् (for शरान्). G3 घोरा. — d) K0.1 B1 Da Dn1 D5 महाशनिसमस्वनान्; K2 महाशनिशमः स्वनं; D1 आशीविषसमान्युधि.

10 G4 om. 10–11. T1 reads 10–11 in marg. — a) K0.1 षड्विंशांस; K2 षड्विंशां; B षड्विंशं; D1.3 G1.3 षड्त्रिंशत्. M2 रभसा (for तरसा). K3.5 D2 षड्विंशतिमथ क्रुद्धो; K4 °ति सुसंक्रुद्धो; D6 °ति समं क्रुद्धो. — b) Ś1 K2 मुमुचाशु. D3 (marg. sec. m. as in text) सुधन्वने; D7 सुयोधनं (for °धने). — c) Ś1 ज्वलिताग्निशिखान्क्रूरान्; K0.2 °ग्निशिखान्घोरान्; K1 °ग्निशिघोरान् (sic); D2 °ग्निसमाकारान्; D6 ज्वलदग्निशिखाकारान्; G3 ज्वलितोग्नि°; M4 °ताग्निशिखान्राजन्. — d) T1 G1–3 अग्नि° (for वज्र°).

11 G4 om. 11 (cf. v. l. 10). — b) G2 सूतमेकं. K3 च विव्यधे; D1 जघान ह; D3 वधिव्यधे (corrupt); T2 G1–3 M अ(G2 त)थावधीत् (for च विव्यधे). T1 सूतमेकेन चावधीत्. — c) Ca जवगान्. K0–2 Da Dn D4.5.7.8 चतुर्भिर्जे(D7 °र्श्वे)वनानश्वान्; S (G4 om.) चतुर्भिरश्वांश्च तथा. — d) D6 यमशासनं; D8 °साधनं.

12 a) D8 तु (for च). Ś1 सुनि°. — b) K3 °मर्दन; D1 °कर्शनं. — c) B Da Dn D4.5.7.8 S चिच्छेद समरे छत्रं; D1 चिच्छेद छत्रं समरे. — d) Ś1 K0–2.5 D1–3 राजंस्तस्य; G1.3 रथस्थस्य. Ś1 रथोत्तमं; K3.5 D2.6 नरोत्तमः (K3 °म); D1 मनोरमं; D3 (marg. sec. m. as in text) यथोत्तमात्; D4 (m as in text) तयोत्तमात्. — After 12, Da1 reads (through eye-wandering) त्रिभिश्च त ग चिच्छेद समरे छत्रं राज्ञस्तस्य रथोत्तमात्.

13 D2 reads (sec. m.) 13ab in marg. — a) K0–2 त्रिभिश्चैवास्य; K3–5 B1 D2 षड्भिश्च तस्य; D1 त्रिभिस्तस्य तु; D3 त्रिभिरस्य च. — b) K0.2 M ज्वलितं (for ज्वलन्तं). K0–2 धनुर् (for ध्वजम्). T G चल(T2 ज्वल°; G1.3 नाग)ध्वजमनुत्तमं. — After 13ab, Ś1 K0–2 ins.:

312* त्रिभिरन्यैर्महेष्वासश्चिच्छेदास्य ध्वजं तथा ।

— c) Ś1 K0–2.4 छित्त्वा चैव; D3 स छित्त्वा तं; G2 चित्त्वा तं च; M4 भित्त्वा तं च. K2 ननादश्च; T2 G1.3 निनादोच्चैस्.

14 a) Ś1 रथश्च; K3 G2 रथाश्च; D3 रथात्तु; T2 राज्ञश्च. G1–3 M2–5 ध्वज° (for ध्वजः). — b) K3 D2 °विभूषितात्. — c) K3.4 B Da Dn D1.2.4–8 भूमौ; D8 S राजन् (for भूमिं). — d) D1 यथा विद्युज्जलागमे.

15 a) K3 M1–3.5 ज्वलितं. — b) K5 T2 नाना° (for नागं). — c) K1 ध्वजे. K2.3 Da1 D2 कुरुपते. K3 B1 छन्नं.

16 b) Ś1 महागजां; K3.5 D1–3 S महाद्विपं. — c) D3 अजघान. D1 शरैर् (for रणे). K3.5 Dn1 वीरं; D2 भीमं; G1 M भीम. — d) D1 स्मरन् (for स्मयन्). D3 सर्वलोकस्य पश्यतः. — After 16, D3 ins.:

313* स तथाभिहतो राजा स्मयन्निव महारथः ।

[(marg. sec. m.) भीमसेनेन संयुगे (for the post. half).]

On the other hand, D4 (before corr.) S read 19.

दुर्योधनस्य जग्राह पार्ष्णिं सत्पुरुषोचिताम् ॥ १७
कृपश्च रथिनां श्रेष्ठः कौरव्यममितौजसम् ।
आरोपयद्रथं राजन्दुर्योधनममर्षणम् ॥ १८
स गाढविद्धो व्यथितो भीमसेनेन संयुगे ।
निषसाद रथोपस्थे राजा दुर्योधनस्तदा ॥ १९
परिवार्य ततो भीमं हन्तुकामो जयद्रथः ।
रथैरनेकसाहस्रैर्भीमस्यावारयद्दिशः ॥ २०
धृष्टकेतुस्ततो राजन्नभिमन्युश्च वीर्यवान् ।
केकया द्रौपदेयाश्च तव पुत्रानयोधयन् ॥ २१

चित्रसेनः सुचित्रश्च चित्राश्वश्चित्रदर्शनः ।
चारुचित्रः सुचारुश्च तथा नन्दोपनन्दकौ ॥ २२
अष्टावेते महेष्वासाः सुकुमारा यशस्विनः ।
अभिमन्युरथं राजन्समन्तात्पर्यवारयन् ॥ २३
आजघान ततस्तूर्णमभिमन्युर्महामनाः ।
एकैकं पञ्चभिर्विद्ध्वा शरैः संनतपर्वभिः ।
वज्रमृत्युप्रतीकाशैर्विचित्रायुधनिःसृतैः ॥ २४
अमृष्यमाणास्ते सर्वे सौभद्रं रथसत्तमम् ।
ववर्षुर्मार्गणैस्तीक्ष्णैर्गिरिं मेरुमिवाम्बुदाः ॥ २५

C. 6. 3473
B. 6. 79. 26
K. 6. 79. 26

---

17 Ko.1 om. (hapl.) 17^{ab}. — a) K3.5 D1.2.6 M1 स (for तु). — b) Ś1 नर° (for रथ°). K2 B D (except D1.2) S महाबलः; K3 महाबलं (for जयद्रथः). — c) B2 जगृहे; Da1 च ग्राह्य. — d) K5 D2 m (before corr. as in text) पार्णि; D6 पार्ष्णि. K5 D2 सत्पुरुषोचितः (D2 °तं); B Da Dn D3-5.7.8 M4 सत्पुरुषैः सह; T G M1-3.5 स्वपुरुषैः सह.

18 a) G3 M4 कृपस्य. — b) Ko.2 कौरवस्यामितौजसः (K2 °स); K1 कौरव्यममितौजसा; D1 कौरवं चामितौजसं; S तव पुत्रमचेतनं. — c) K1.2 D8 अरोपयद्. D1 रथे. D8 तूर्णं (for राजन्). — d) S दुर्योधनमथ स्वकं.

19 D4 (before corr.) S read 19 after 16. — b) D3 (marg. *sec. m.*) स्नय(p. सीद)त्रिव महारथः. — c) B1.2 Da1 Dn1 विषसाद; D6 निससाद. Ś1 रथोपस्थ. — d) K3 Dn2 D2.3.6 राजन् (for राजा). K3 तव (for तदा). S मूर्छाभिहतचेतनः.

20 a) B Da Dn D4.5.8 रणे भीमं; T2 रिपून्वीरान्. — b) K3.5 D2.6 जेतु° (for हन्तु°). — c) K4 शरैर् (for रथैर्). Ko.1 अनीकसाहस्रैर्. — d) K3 [अ]वारयन्; D1 वारयन्. M3.5 दिशं. D8 भीमसेनं समावृणोत्.

21 a) D5 ततोन्यस्यम् (for ततो राजन्). — c) MSS. (indiscriminately) कैकेया, कैकया, etc. Ś1 द्रौपदेयश्च. — d) K4 B1 D8 अयोधयत्.

22 Ko om. (hapl.) 22-23. — a) K2 चित्रसेन-. K4 च चित्रश्च; T1 G सुमित्रश्च. T2 सुचित्रश्चित्रसेनश्च. — K1.3 om. (hapl.) 22^{bc}. — b) K2.4 B D (except D1-3) T G4 चित्रांगश् (for चित्राश्वश्). — c) Ś1 K4 D2.3 सुचित्रश्च; D1 विचित्रश्च; T1 G स्ववाहुश्च (for सुचारुश्च). K3 B Da Dn D4-8 सुचारुश्चारुचित्रश्च.

23 Ko om. 23 (cf. v. l. 22). — b) K3 कुमाराश्च; K4 कुमाराः सु-; D8 कुमारास्ते (for सुकुमारा). K1 मुक्तसारथशोखिनः; S तक्षमाणाः शिलाशितैः. — c) D2 प्राप्य (for राजन्). B1 अभिमन्युं महाराजन्; Da Dn1 D5 अभिमन्युं महाराज. — K3.5 D2 om. (hapl.) 23^{d}–26^{c}. — d) D1 तावकाः (for समन्तात्).

24 K3.5 D2 om. 24 (cf v. l. 23). — a) D8 अजघान; G2 आजघानस्; M2 आजानतस्. — b) B2 T2 M महारथः; D4 m T1 G महारथान्. — c) G1.3 दशभिर् (for पञ्चभिर्). K3 वद्धा (sic); K4 B1.2 Da Dn1 D1.3.5.6 S बाणैः (for विद्ध्वा). — d) Ś1 K4 B1 Da Dn1 D3.5.6 T2 M1.3-5 शितैः; B2 चित्रैः; D1 विध्वा; D4 T1 G4 शिरैः; M2 तीक्ष्णैः (for शरैः). — e) D3.6 वज्रमृत्युप्रकाशैस्तु. — f) Ko-2 चित्रायुधविनिःसृतैः; Da Dn1 D3.5 T G विचित्रायुधनि(*or* निः)स्वनैः; D1 सुविचित्रैर्दृढैस्तथा; M विवि(M2 °व्या)धायुधनिस्वनैः.

25 K3.5 D2 om. 35 (cf. v. l. 23). — b) Ko.2.4 B1.2.4 Da2 G3 M1-3.5 सौभद्र(Ko M1-3.5 °द्रं)रथमुत्तमं; D1 °द्रं रथसत्तमाः. — c) K1.4 B3.4 Da1 Dn1 G2.3 M2 ववृषुर्; B1 ददृशुर्. D6 सायकैस् (for मार्गणैस्). D1 ववर्षुर्बाणैस्तीक्ष्णाग्रैर्; T2 ववर्षुर्मार्गणगणैर्. — d) G2.3 M5 गिरिर्. Ś1 जलैर् (for मेरुम्). D6 T2 G3 [अं]बुदः (G3 °दां).

C. 6. 3473
B. 6. 79. 26
K. 6. 79. 26

स पीड्यमानः समरे कृतास्त्रो युद्धदुर्मदः ।
अभिमन्युर्महाराज तावकान्समकम्पयत् ।
यथा देवासुरे युद्धे वज्रपाणिर्महासुरान् ॥ २६
विकर्णस्य ततो भल्लान्प्रेषयामास भारत ।
चतुर्दश रथश्रेष्ठो घोरानाशीविषोपमान् ।
ध्वजं सूतं हयांश्चास्य छित्त्वा नृत्यन्निवाहवे ॥ २७
पुनश्चान्याञ्शरान्पीतानकुण्ठाग्राञ्शिलाशितान् ।
प्रेषयामास सौभद्रो विकर्णाय महाबलः ॥ २८
ते विकर्णं समासाद्य कङ्कबर्हिणवाससः ।
भित्त्वा देहं गता भूमिं ज्वलन्त इव पन्नगाः ॥ २९
ते शरा हेमपुङ्खाग्रा व्यदृश्यन्त महीतले ।
विकर्णरुधिरक्लिन्ना वमन्त इव शोणितम् ॥ ३०
विकर्णं वीक्ष्य निर्भिन्नं तस्यैवान्ये सहोदराः ।
अभ्यद्रवन्त समरे सौभद्रप्रमुखान्रथान् ॥ ३१
अभियात्वा तथैवाशु रथस्थान्सूर्यवर्चसः ।
अविध्यन्समरेऽन्योन्यं संरब्धा युद्धदुर्मदाः ॥ ३२
दुर्मुखः श्रुतकर्माणं विद्ध्वा सप्तभिराशुगैः ।
ध्वजमेकेन चिच्छेद सारथिं चास्य सप्तभिः ॥ ३३
अश्वाञ्जाम्बूनदैर्जालैः प्रच्छन्नान्वातरंहसः ।
जघान षड्भिरासाद्य सारथिं चाभ्यपातयत् ॥ ३४

---

26 $K_{3.5}$ D_2 om. 26^{abc} (cf. v. l. 23). — ^{a}) K_0 स पीड्यमानाः; B_2 D_1 संपीड्यमानः; T_1 G स विध्य°; M_4 स वध्य°. — ^{b}) D_6 कृशास्त्रो. K_0 (before corr.) °दुर्मदाः. — ^{c}) D_1 महाबाहुस्; D_3 महातेजा; D_6 ततो राजंस् (for महाराज). — ^{d}) $K_{3.5}$ D_2 तावकाः. K_1 समरिकल्पयत् (hypermetric); K_3 D_2 समकंपयन्; K_4 °कालयत्. — ^{e}) D_2 यद्वद्; T_1 G पुरा; M_2 तथा (for यथा). $Ś_1$ देवसुरे; B_2 देवारि*. — ^{f}) S इवा° (for महा°). K_3 D_2 °पाणि महासुराः.

27 ^{a}) B_4 विकर्णोपि; Dn_2 D_{5-8} $M_{1-3.5}$ विकर्णाय; T_2 विकर्णं च. Da_2 Dn $D_{4.5.7.8}$ तथा (for ततो). — ^{c}) K_3 रथश्रेष्ठान्; D_1 नरश्रेष्ठः. — ^{d}) D_1 S शरान् (for घोरान्). — After 27^{d}, N ins.:

314* स तैर्विकर्णस्य रथात्पातयामास वीर्यवान् ।

[D_1 रथं (for रथान्), and भेदयामास (for पात°) in the post. half. K_4 भारत (for वीर्यवान्).]

— ^{e}) $Ś_1$ K_1 हयाश्चास्य; $K_{3.4}$ D_3 T_1 G (G_1 damaged) हयांश्चैव; B Da (Da_1 damaged) Dn $D_{1.2.4-8}$ T_2 M हयांश्चापं ($D_{1.6}$ T_2 °पि). — ^{f}) N नृत्यमान (K_0 °ना) (for छित्त्वा नृत्यन्).

28 ^{a}) Dn $D_{7.8}$ ततश्च (for पुनश्च). D_1 दीप्तान् (for पीतान्). — ^{b}) K_2 अकुंठाग्रा; B_2 अकुश्चाग्रान्; D_1 कुठाराग्रान्; G_2 नकुंठाग्रान्; G_3 अकर्णाग्रान्. B Da Dn $D_{4.5.7.8}$ अजिह्मगान् (for शिलाशितान्). — ^{c}) G_3 प्रेष्य°. $K_{3.5}$ Dn_1 $D_{1.2.6}$ संक्रुद्धो (for सौभद्रो). — ^{d}) $Ś_1$ $K_{0-2.4}$ महारथः (for °बलः).

29 ^{a}) $Ś_1$ समासद्य. — ^{b}) K_3 D_2 कंकबर्हण°; M_4 °र्हिणवासवः. — ^{c}) $K_{0.1}$ छित्वा; K_5 भूत्वा; D_3 अभित्वा (hypermetric). K_1 भूमिश्च; G_1 भूम्यां; G_3 भूम्या. — ^{d}) $Ś_1$ $K_{0.2}$ D_3 श्वसंत; K_1 चासंत; K_3 Da_1 G_2 ज्वलंतस्; D_1 स्फुरंत (for ज्वलन्त).

30 ^{a}) K_5 हेमसंकाशा. — ^{b}) T_2 ह्यदृश्यंत; $M_{3.5}$ व्यादृश्यंत. T_1 G प्रत्यदृश्यंत भूतले. — ^{c}) G_3 विकीर्णा रुधिरा°. — ^{d}) B_4 शोभितं (for शोणितम्).

31 ^{a}) D_1 S प्रेक्ष्य (for वीक्ष्य). D_1 तैर्भिन्नं; S निर्भिण्णं. — ^{b}) Da_2 (by corr.) तथैवान्ये; D_1 तस्य चान्ये; D_6 तथा चान्ये; S तव सैन्ये ($G_{1.3}$ °न्यं). $Ś_1$ K_2 महोदराः. — ^{c}) $Ś_1$ अभ्याद्रवंत. — ^{d}) K_4 रणे (for रथान्). D_1 सौभद्रं युद्धदुर्मदाः.

32 ^{a}) Da Dn $D_{4.5.7.8}$ T_1 G M अभियाय; D_1 °मन्युस्; D_2 °याद्वा; D_3 °गम्य; D_6 °यातास्; T_2 °धाय. K_5 D_2 तथैवान्यान्; T_1 G रथैराशु. — K_2 om. 32^{bc}. — ^{b}) $K_{3.4}$ B Da Dn $D_{1.3-8}$ T_2 M रथांस्तान्; K_5 D_2 तांस्तथा (for रथस्थान्). D_3 सूर्यसंनिभान्. — ^{c}) $M_{2.5}$ अविध्यत्. — ^{d}) K_{0-2} रथस्था; $K_{3.5}$ संरभाद्; K_4 B $D_{2.6}$ संरंभाद्; G_4 संरब्धाद् (for संरब्धा). $Ś_1$ K_5 °दुर्मदः.

33 ^{a}) G_{1-3} M_4 दुर्मुख. $Ś_1$ श्रुतशर्माणं; D_3 S (except T_2 M_4) °वर्माणं. — ^{b}) D_6 विध्यात् (for विद्ध्वा). K_{0-2} D_1 पंचभिर् (for सप्तभिर्). — ^{d}) T_1 G तस्य (for चास्य).

34 ^{a}) K_2 G_2 अश्वा. K_1 चांबू° (for जाम्बू°). Da_1 ज्वालैः; T G (G_1 damaged) बाणैः (for जालैः).

स हताश्वे रथे तिष्ठञ्श्रुतकर्मा महारथः ।
शक्तिं चिक्षेप संक्रुद्धो महोल्कां ज्वलितामिव ॥ ३५
सा दुर्मुखस्य विपुलं वर्म भित्त्वा यशस्विनः ।
विदार्य प्राविशद्भूमिं दीप्यमाना सुतेजना ॥ ३६
तं दृष्ट्वा विरथं तत्र सुतसोमो महाबलः ।
पश्यतां सर्वसैन्यानां रथमारोपयत्स्वकम् ॥ ३७
श्रुतकीर्तिस्तथा वीरो जयत्सेनं सुतं तव ।
अभ्ययात्समरे राजन्हन्तुकामो यशस्विनम् ॥ ३८
तस्य विक्षिपतश्चापं श्रुतकीर्तेर्महात्मनः ।
चिच्छेद समरे राजञ्जयत्सेनः सुतस्तव ।
क्षुरप्रेण सुतीक्ष्णेन प्रहसन्निव भारत ॥ ३९
तं दृष्ट्वा छिन्नधन्वानं शतानीकः सहोदरम् ।
अभ्यपद्यत तेजस्वी सिंहवद्विनदन्मुहुः ॥ ४०
शतानीकस्तु समरे दृढं विस्फार्य कार्मुकम् ।
विव्याध दशभिस्तूर्णं जयत्सेनं शिलीमुखैः ॥ ४१
अथान्येन सुतीक्ष्णेन सर्वावरणभेदिना ।

C. 6. 3492
B. 6. 79. 45
K. 6. 79. 46

— b) D1 संपृक्तान्; D3 S संछन्नान् (M4 °न्ना). K1 वाहरंहसः; D1 सूर्यवर्चसः (for वातरंहसः). — d) Ś1 चभ्यपातयत् (sic); K0–2 D3 M4 च न्यपातयत्; K3 चास्य पातयत्; D1 च व्यकृंतत; D6 चाप्यपातयत्; T1 G M1–3. 5 च न्य(G2. 3 नि)बर्हयत्; T2 चास्य वाहनान्.

35 a) B2 D2 हताश्व-; D1 हताश्वो. — b) Ś1 श्रुतशर्मा; D3 S (except T2) °वर्मा. B Da2 Dn2 D4. 5. 7. 8 महाबलः (for °रथः). — c) Da1 D5 चिच्छेद (for चिक्षेप). S समरे (for संक्रुद्धो). — d) Ś1 महोल्का; Da1 Dn1 (before corr.) महोल्कान्.

36 a) M5 दुर्मदस्य. K4 Dn2 M1–3. 5 विमलं. — b) K1 वर्दंभिःत्वा (corrupt); Dn1 (before corr.) चर्म भित्वा; Dn2 D1 मर्म भित्वा. D1 महाप्रभा; D5 यशस्विनं; S महात्मनः (for यशस्विनः). — c) Da1 वैदार्य; D2 (*sup. lin.* as in text) विवार्य. T2 प्रविशद्. — d) K3 D6 M1 दीप्यमानाः; K5 दीप्यमानं; Da1 °मान-. K3 D3 सुतेजनाः; K4. 5 B Da Dn D2. 4–8 S स्व(D3 M1. 3 सु-; D6 तु)तेजसा; D1 सुवर्चसा. — After 36, S ins.:

315* दुर्मुखो विह्वलस्तत्र निषसाद रथे विभो ।
विसंज्ञं प्रेक्ष्य ते सर्वे भ्रातरः पर्यवारयन् ।

[(L. 1) T2 विपुलस्तत्र. M4 बभौ (for विभो). — (L. 2) T2 परि° (for पर्य°).]

37 a) K2 ते दृष्ट्वा; K5 दृष्ट्वा च. — After 37^{a}, G3 (erroneously) *repeats* from निषसाद in line 1 to पर्यवारयन् in line 2 of 315*. — b) K3. 5 D1. 3. 6 श्रुत° (for सुत°). Ś1 महाचलः; K3–5 D2. 6 M °रथः. — c) K1 पश्यंतां. — d) Ś1 K0–2 ततः (for स्वकम्).

38 a) M4 श्रुतकीर्ति. Dn2 D4. 8 महा-; T G M4 ततो (for तथा). — b) K3 जयत्सेन-; K4 Dn2 जयसेनः; B2–4 Da1 Dn1 D1. 2. 7. 8 जयसेनं. K4 Da D5 सुतस्तव. — K4 om. (hapl.) 38^{c}–39^{d}. — c) Ś1 अध्ययात् (sic); K3 अभ्यायात्. D1 त्वरितो (for समरे). — K0 om. (hapl.) 38^{d}–39^{c}. — d) K1. 2 जयत्सेनं (K2 °नः) सुतं त(K2 °तस्त)व; K3 हंतुकामो यशस्विनः.

39 K4 om. 39^{abcd}; K0 om. 39^{abc} (cf. v. l. 38). K1 om. 39^{ab}. — a) B2–4 विक्षेपतश्. — b) K2 Da1 D5 श्रुतकीर्तिर्. K3. 5 D1. 2. 6 महास्वनं (for महात्मनः). — c) K1 अभ्ययात् (for चिच्छेद). K3 D2 सशरं (for समरे). Ś1 चापं; K3. 5 B1 Dn1 D2 तूर्णं; D1 भीमं; D6 वीरो; T1 G M4 सज्यं; T2 सत्यं (for राजन्). — d) K2 Da2 D2. 5 जयसेन-; B2–4 Da1 Dn D1. 4. 7. 8 °सेनः; M1 °त्सेन-. — T2 om. (hapl.) 39^{f}–42^{a}. — f) = 6. 24. 10^{b}. K1 भारतः.

40 T2 om. 40 (cf. v. l. 39). — a) M3 दृष्ट्वा तं (by transp.). T1 G2. 4 भीमकर्माणं; G1. 3 भीमधन्वानं (for छिन्न°). — b) M4 सहोदरः. — c) Da2 Dn1 D5 अभ्यप(D5 °स्प)तत. — d) Da2 Dn1 D1 सिंहवन्. K0–4 B Da1 D2. 5–7 निनदन्; K5 M1. 3. 5 व्यनदन्. B1. 2 S (T2 om.) रणे (for मुहुः).

41 T2 om. 41 (cf. v. l. 39). — a) Da1 शतनीकस्. D1 च (for तु). — b) G1–3 M1. 2. 4. 5 विस्फार्य. — K5 om. 41^{cd}. — c) K4 समरे (for दशभिस्). T1 G2. 4 तीक्ष्णैर् (for तूर्णं). — d) K4 B Dn D1. 7. 8 जयसेनं; Da1 °सेने; D6 °त्सेने. — Ś1 K0–2. 4 B3 S (T2 om.) ins. after 41: K5 (om. 41^{cd}) ins. after 41^{ab}:

C. 6. 3492
B. 6. 79. 45
K. 6. 79. 46

शतानीको जयत्सेनं विव्याध हृदये भृशम् ॥ ४२
तथा तस्मिन्वर्तमाने दुष्कर्णो भ्रातुरन्तिके ।
चिच्छेद समरे चापं नाकुलेः क्रोधमूर्छितः ॥ ४३
अथान्यद्धनुरादाय भारसाधनमुत्तमम् ।
समादत्त शितान्बाणाञ्शतानीको महाबलः ॥ ४४
तिष्ठ तिष्ठेति चामन्त्र्य दुष्कर्णं भ्रातुरग्रतः ।
मुमोच निशितान्बाणाञ्ज्वलितान्पन्नगानिव ॥ ४५
ततोऽस्य धनुरेकेन द्वाभ्यां सूतं च मारिष ।
चिच्छेद समरे तूर्णं तं च विव्याध सप्तभिः ॥ ४६
अश्वान्मनोजवांश्चास्य कल्माषान्वीतकल्मषः ।
जघान निशितैस्तूर्णं सर्वान्द्वादशभिः शरैः ॥ ४७
अथापरेण भल्लेन सुमुक्तेन निपातिना ।
दुष्कर्णं समरे क्रुद्धो विव्याध हृदये भृशम् ॥ ४८
दुष्कर्णं निहतं दृष्ट्वा पञ्च राजन्महारथाः ।

316* ननाद सुमहानादं प्रभिन्न इव वारणः ।

[T1 G M च (for सु-). Ś1 प्रभिन्ना. T1 G M प्रावृषीव बलाहकः (for the post. half).]

42 T2 om. 42^{a} (cf. v. l. 39). — ^{a}) D3. 6 तथान्येन. — ^{b}) B3 सर्वावरणशोभिना; G1. 3 सर्वास्त्रवरसेविना. — ^{c}) B2-4 Da Dn D4. 5. 7. 8 जयसे(Da2 D5 °त्से)नं शतानीको; T2 शतानीको जयत्सैन्यं. — ^{d}) D1 समरे (for हृदये).

43 ^{a}) Ś1 K0-2 transp. तथा and तस्मिन्. S विनिर्भिण्णे (for वर्तमाने). — ^{b}) K5 B1 अंतिकं. — After 43^{ab}, S ins.:

317* मुमोचास्मै शितान्बाणांस्तीक्ष्णानाशीविषोपमान् ।

[T2 G1. 3 मुमोच नि- (for °चास्मै).]

— ^{c}) K0-2 B2. 3 D4. 6. 8 सशरं; S च तदा (G3. 4 °था) (for समरे). — ^{d}) Ś1 नकुलः; K0 Da1 नाकुले; G2 नाकुल- (for नाकुलेः).

44 ^{a}) K2 D6 अथान्यधनुर्. — ^{b}) K3-5 Dn2 D2. 4. 7. 8 भारसाह(K3 °र)मनु(D2 °मसु)त्तमं. — ^{c}) B2. 3 Da Dn1 D5. 7. 8 समाधत्त; D1 समादाय; S समधत्त. K2 शतान्बाणान्; K3-5 B D शरान्घोरान्. — M2 om. (hapl.) 44^{d}-45^{c}. — ^{d}) G3 महारथः (for °बलः).

45 M2 om. 45^{abc} (cf. v. l. 44). — ^{a}) D1 चाभाष्य; G1. 3 च वदन् (for चामन्त्र्य). — ^{b}) B1 भ्रातरं युधि. — ^{c}) Ś1 मुमुचे निशितान्; K2 मुमोच निशतान्; K3-5 B1. 2. 4 D T2 मुमोचास्मै शि(K5 D2 सि)तान्. — ^{d}) D7 क्ष्वेलितान्. Ś1 इव पन्नगान्; K2 पन्नुगानिव; K5 पन्नगा इव; T1 G1. 2. 4 M पावकानिव; T2 इव पंचमान्; G3 इव पावकान् (for पन्नगानिव).

46 ^{a}) Ś1 ततश्च (for ततोऽस्य). M2 धनुरेतेन. — ^{c}) B1. 2 Da Dn1 वीरस्; D5 वीर; S राजंस् (for तूर्णं). — ^{d}) G1-3 विव्याथ. K0-2. 5 पत्रिभिः.

47 ^{a}) K5 °जवाश्च. Ś1 K0-2 D1. 2 तस्य (for चास्य). — ^{b}) K2 D7. 8 कल्मषान्; B1 कम्पायान्; M1. 2. 5 कन्माषा(M3 °षि)न्; Cc. v कल्मा° (as in text). K3. 5 D1-3. 6 Cv वातरंहसः; M1. 2. 5 वीतकन्मषः. — ^{c}) D3 T1 G बाणैः; D6 T2 M तीक्ष्णैः (for तूर्णं). — ^{d}) D3 ततः; S (except T2) शितैः (for शरैः). D1 संनद्धो दशभिः शरैः.

